22X201.2S

REG NO:

# END TERM EXAMINATION JUNE 2023
# BA/ BCA/ BBA/ BCOM - II SEMESTER
# GH101.2S/GC201.2S/ GA301.2S/ GB401.2S: SANSKRIT

**Duration: 2 Hours** **Max Marks: 60**

**Instruction: PART- A and 6th main of PART-B** answers should be written in Sanskrit, **PART-B, and PART-C** answers can be written in English or Kannada.

## PART-A

Answer **any EIGHT** questions. **Each** question carries **TWO** marks. **(8 X 2 = 16)**
समीचीनम् उत्तरं संस्कृत-भाषया लिखत ।
**Write the correct answer in Sanskrit.**

1. रघुवंशं कस्य कृति:? किरातार्जुनीयस्य रचयिता क:?
2. रघुवंशे कति सर्गा: सन्ति? तस्मिन् केषाम् अन्वय: वर्णित:?
3. सूर्यप्रभवो वंश: क:? दिलीपस्य गुरु: क:?
4. दिलीपस्य पत्नी का? सा कस्मिन् वंशे जाता?
5. रघुवंशस्य राजान: कीदृशा:? दिलीप: किमर्थं बलिमग्रहीत् ?
6. रघुवंशस्य राजान: किमर्थं संभृतार्था: ? ते कथं तनुं त्यजन्ति ?
7. दिलीप: स्वपत्न्या सह वसिष्ठाश्रमं कदा प्रापत् ? तौ दम्पती कस्य आश्रमं जग्मतु:?
8. महीक्षितामाद्य: क:? छन्दसाम् आद्य: क:?
9. दिलीप: किमर्थं गां दुदोह? मघवा किमर्थं दिवं दुदोह?
10. क्षीरनिधौ इन्दु: इव रघुवंशे क: प्रसूत:? दिलीपस्य कया विना वृद्धत्वमासीत्?

## PART-B

Answer **any FOUR** questions. **Each** question carries **SIX** marks. **(4 X 6 = 24)**
श्लोकानुवादं कृत्वा भावार्थं लिखत ।
Translate and explain the following Shlokas.

1. क्व सूर्यप्रभवो वंश: क्व चाल्पविषया मति: ।
   तितीर्षुर्दुस्तरं मोहादुडुपेनास्मि सागरम् ॥

2. वैवस्वतो मनुर्नाम माननीयो मनीषिणाम् ।
आसीन्महीक्षितामाद्यः प्रणवश्छन्दसामिव ॥

3. अनाकृष्टस्य विषयैर्विद्यानां पारदृश्वनः ।
तस्य धर्मरतेनासीद्वृद्धत्वं जरसा विना ॥

**सन्दर्भं विवृणुत ।**
Explain with reference to context.

4. "जगतः पितरौ वन्दे पार्वतीपरमेश्वरौ ।"

5. "पत्नी सुदक्षिणेत्यासीदध्वरस्येव दक्षिणा ।"

6. **गद्यांशं पठित्वा प्रश्नानामुत्तराणि लिखत ।**
Read the given paragraph and answer the questions.

कस्मिंश्चिद् ग्रामे कश्चन वृद्धः कृषकः अवसत् । सः परिश्रमी , दूरदर्शी तथा सरलस्वभावः आसीत् । तस्य चत्वारः पुत्राः आसन् । परं ते अलसाः आसन् । तेषां कृषिकार्ये अभिरुचिः नासीत् । अस्मात् कारणात् वृद्धकृषकः चिन्तितवान् । तस्य मरणकाले सः स्वपुत्रान् अकथयत् – " मम क्षेत्रेषु गुप्तं धनं वर्तते , मम मरणानन्तरं क्षेत्राणि खनित्वा गुप्तं धनं प्राप्नुयुः " इति । एतत् श्रुत्वा पुत्राः प्रासीदन् । पितुः मरणानन्तरं ते क्षेत्राणि अकर्षन् । परं गुप्तं धनं न लब्धम् । ते निराशाः सञ्जाताः । अन्ते मातुः प्रेरणया ते पुत्राः क्षेत्रेषु बीजानि अवपन् । परिणामतः प्रभूतं धान्यं लब्धम् । धान्यविक्रयेण ते प्रभूतं धनं प्राप्तवन्तः । तदा ते पुत्राः गुप्तधनस्य रहस्यम् अवागच्छन् । अतः एव वदन्ति – **उद्यमेनैव सिध्यन्ति कार्याणि , न मनोरथैः ।**

**प्रश्नाः–**

a) वृद्धः कृषकः कुत्र अवसत् ?
b) सः कथमासीत् ?
c) तस्य कति पुत्राः आसन् ?
d) वृद्धः मरणकाले स्वपुत्रान् किम् अकथयत् ?
e) वृद्धस्य पुत्राः किमर्थं निराशाः सञ्जाताः ?
f) कृषकस्य पुत्राः गुप्तधनस्य रहस्यं कथम् अवागच्छन् ?

## PART-C

Answer **any TWO** questions. **Each** question carries **TEN** marks. **(2 X 10 = 20)**
**प्रबन्धरूपेण उत्तरं लिखत ।**

1. महाकाव्य–लक्षणानि लिखत ।
Write about the characteristics of a Mahakavyam.

2. वसिष्ठाश्रमं वर्णयत ।
Describe the hermitage of Vasishtha.

3. कालिदासस्य देश–कल–कृती: अधिकृत्य प्रबन्धं लिखत ।
   Write about the place, date and works of Kalidasa.

4. दिलीपस्य वसिष्ठाश्रमगमनं विवृणुत ।
   Describe the Journey of Dilipa to the hermitage of Vasishtha.

*****